# श्रीसुरसरस्वतीसभा, शृङ्गेरि

## तुरीयपरीक्षा

## द्वितीयपत्रिका

दिनाङ्कः 29-01-2023 | अङ्काः - 50

अपराह्णे – 1:30 तः 3:00 पर्यन्तम् | समयः – सार्धैकहोरा

<u>सूचना – सर्वाणि उत्तराणि संस्कृतेन एव लेखनीयानि</u>

**1 विषयमेकम् अधिकृत्य दशभिः वाक्यैः प्रबन्धमेकंलिखत ।** 5

१. रामायणम्   २. भारतदेशः   ३. गीताजयन्ती

2 (अ) तिङ्-प्रत्ययाः कति सन्ति ? तिङ्-प्रत्ययान् लिखत । तेषां प्रत्ययानां 'तिङ्' इति नाम कथं संगच्छते ? 4

आ) द्वितीया विभक्तिः कदा उपयुज्यते ? सोदाहरणं विवृणुत । 4

3 (अ) "वाणी तव सुधा विद्वन्" – अत्र कः अलङ्कारः इति सलक्षणं विशदयत । 4

(आ) "प्रियेषु सौभाग्यफला हि चारुता"- एतस्य वृत्तं सलक्षणं विवृणुत । 4

**4 उत्तरं लिखत । (त्रयाणामेव)** 3

१. पूर्णविरामचिह्नं कदा उपयुज्यते ? सोदाहरणं लिखत ।

२. 'विना' शब्दयोगे काः विभक्तयः प्रयोक्तुं शक्यन्ते ?

३. काव्ये चमत्कारस्य कारणानि कानि ?

४. 'अकृथाः' इत्यत्र धातुः लकारश्च कः ?

**5 द्वयोः लकारयोः पुरुषत्रये सर्वरूपाणि लिखत ।** 6

१. चकार   २. अवर्धिष्ट   ३. लब्धा   ४. भूयात्

**6. प्रयोगपरिवर्तनं कुरुत ।** 4

१. तौ उपविशतः ।   २. चन्द्रापीडेन युवराजेन भवितव्यम् ।

३. ललनाः स्नानाय नदीं गच्छन्ति ।   ४. प्रयत्यतां यथाशक्ति, भविष्यते फलेन ।

7 **वाक्यदोषं परिहरत ।** 4

१. दानेभ्यः अन्नदानं प्रशस्यते ।

२. उदितः सूर्ये कृषीवलाः क्षेत्रम् अगच्छन् ।

३. हरेः रोचते भक्तिः ।

४. मन्त्री भाषणं विरमति ।

8 **टिप्पणीं लिखत । (एकस्य)** 2

१. लिट्-लकारः २. निर्धारणम्

9 **मातृभाषया अनुवदत ।** 5

१. भीमात् अन्यः चेत् अभविष्यत् न अजेष्यत् कीचकम् ।

२. जीयात् गीर्वाणभारती ।

३. नवरात्रोत्सवे वयं शृङ्गेरीं यातास्मः ।

४. भगवान् नारायणः वसुदेवात् देवक्यां श्रीकृष्णनाम्ना अवततार ।

५. इदं सर्वं वयं पूर्वमेव अवोचाम ।

10 **संस्कृतभाषया परिवर्तयत ।** 5

१. ನಾವು ಮನೆಯನ್ನು ಬಿಟ್ಟುಹೋದರೆ ಕಳ್ಳರು ಸಾಮಾನುಗಳನ್ನು ಕದಿಯುವರು.

If we leave the house, thieves will steal the things.

२. ತಂದೆ ನೋಡಿದ್ದರೆ ವಿಷಣ್ಣನಾಗುತ್ತಿದ್ದನು.

If father had seen, he would have felt sad.

३. ಅಕ್ಕಸಾಲಿಗರು ಚಿನ್ನದಿಂದ ಒಡವೆಗಳನ್ನು ಮಾಡಿದರು.

Goldsmiths made ornaments using Gold.

४. ಕೌಸಲ್ಯೆ ಬರಲಾಗಿ ಸೀತೆ ಎದ್ದು ನಿಂತುಕೊಂಡಳು.

Seeta stood up as Kousalya came.

५. ನೀವಿಬ್ಬರೂ ವಿದ್ಯೆಯನ್ನು ಪಡೆಯಿರಿ.

May both of you attain knowledge.

--------------------------